# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| **कक्षा- शास्त्री-१ (SEM-1)** | **प्रश्नपत्र-८** | **गुणाः - ७०** |
| **विषयः- वास्तुशास्त्रम्** | **CE112** | **समयः - ०३ तः ०६** |
| **दिनाङ्कः - १४/१२/२०१६** | **सन्दर्भग्रन्थः -वास्तुरत्नावली** | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ निम्नलिखितेषु कयोश्चित् द्वयोः ससन्दर्भं व्याख्यां कुरुत । ०८**

१. पूर्वे ब्राह्मणराशीनां वैश्यानां दक्षिणे शुभम् ।
शुद्राणां पश्चिमे द्वारं नृपाणामुत्तरे मतम् ॥

२. हस्तमात्रं खनेत्खातं निशादौ जलपूरितम् ।
प्रातर्दृष्टे जले वृद्धिस्समः पङ्के व्रणे क्षयः ॥

३. प्रथमे सुसमे क्षेत्रे प्राचीं संसाधयेत्स्फुटम् ।
सिद्धान्तोक्तप्रकारेण ततो निष्पादयेद् गृहम् ॥

**प्र-२ शल्यशोधनपद्धतिः ग्रन्थाधारेण प्रतिपादयत । ०८**

**अथवा**

**ग्रामवासे शिवाबलिनिरूपणं शुभाशुभफलसहितं दर्शयत ।**

**प्र-३ द्वयोरुपरि टिप्पणीं लिखत । ०४**

१. वास्तुप्रदीप्रोक्त भूमेर्वर्णविचारः ।

२. नागपृष्ठभूमिलक्षणम् ।

३. गृहस्य चतुर्दिक्षु वृक्षविचारः ।

४. राशीपरत्वेन द्वारनिवेशफलम् ।

**प्र-४ केषाञ्चित् पञ्चप्रश्नानामुत्तराणि देयानि । ०५**

१. पूर्वप्लवाभूम्याः फलं किम् ?

२. वैश्याभूम्याः फलं किम् ?

३. गजपृष्ठभूमिः वास्तुकर्मणि शुभं भवति न वा ?

४. अप्रश्ने कस्यां दिशायां शल्यं प्राप्यते ?

५. प्रासादनिर्माणस्य पूर्वं दिक्साधनम् आवश्यकं न वा ?

६. गृहे फलिनवृक्षस्य फलं किम् ?

७. कूपखनने वास्तुपूजनम् आवश्यकं न वा ?

**॥ द्वितीयान्वितिः ॥**

**प्र-५ निम्नलिखितेषु द्वयोः सप्रसङ्गं व्याख्यां कुरुत । ०८**

१. षष्टिश्चतुर्भिहीनां वेश्मानि पञ्च सचिवस्य ।
स्याष्टांशयुतं दैर्घ्यं तदर्धतो राजमहिषीणाम् ॥

२. दैर्घ्ये नवांशात्पदमत्र सव्याद् द्वारं प्राक् त्रिचतुर्विभागे ।
चतुर्थषष्ठे दिशि दक्षिणस्यां पश्चाच्चतुःपञ्चमके तथोदके ॥

३. पाषाणेष्टादिगेहन्तु निन्द्यमासे न कारयेत् ।
तृणकाष्ठगृहारम्भे मासदोषो न विद्यते ॥

**प्र-६ स्तम्भारोपणनिर्णयः ग्रन्थाधारेण स्पष्टयत । ०८**

**अथवा**

**वास्तुपदमण्डलाधारे गृहद्वारनिर्णयः ग्रन्थाधारेण प्रतिपादयत ।**

**प्र-७ द्वयोरुपरि टिप्पणीं लिखत । ०४**

१. गृहारम्भे पक्षशुद्धिः ।

२. शालाध्रुवाङ्कानयनविधिः ।

३. युवराजस्य पञ्चगृहप्रमाणम् ।

४. सौरमासवशेन गृहद्वारविचारः ।

**प्र-८ केषाञ्चित् पञ्चप्रश्नाः समाधेयाः । ०५**

१. कार्तिकमासे गृहारम्भे किं फलम् ?

२. कर्कसंक्रान्त्यां पश्चिमाभिमुखगृहारम्भे किं फलम् ?

३. तृणगृहे आयविचारः कर्तव्यं न वा ?

४. पितृपदोपरि द्वारस्थापने किं फलम् ?

५. प्रथमस्तम्भस्थापनं कस्यां दिशायां करणीयम् ?

६. कृष्णपक्षे गृहारम्भे किं फलम् ?

७. मेषराश्याः नक्षत्राणि कानि ?

**॥ तृतीयान्वितिः ॥**

**प्र-९ निम्नलिखितेषु द्वयोः सान्वयं व्याख्यां कुरुत । ०८**

१. सेव्यसेवकयोश्चैव गृहतत्स्वामिनोरपि ।
परस्परं मित्रयोश्चेदेकनाडी प्रशस्यते ॥

२. यदि कश्चिज्जनस्तस्यां द्वारं यत्कुरुते भ्रमात् ।
तदा मुख्यजनो गेहे विनाशमुपगच्छति ॥

३. त्यजेद्राशिरोभागे बाह्ये सप्तदशांशकान् ।
मध्ये नाभिं विजानीयात्तत्र शङ्कुं निवेशयेत् ॥

**प्र-१० राहुमुखपरत्वेन देवालयादीनां खातनिर्णयः स्पष्टयत । ०८**

**अथवा**

**गृहारम्भे पञ्चाङ्गशुद्धिः ग्रन्थाधारेण प्रदर्शयत ।**

**प्र-११ एकस्योपरि टिप्पणीं लिखत । ०२**

१. सुप्तभूमिलक्षणम् ।

२. षष्ठभावस्थग्रहाणां फलम् ।

**प्र-१२ द्वयोः लघूत्तरं लिखत । ०२**

१. शिलाविन्यासपूर्वं भूमिपूजनं करणीयं न वा ?

२. मिथुनसंक्रान्त्यां देवालयस्य खातमुहूर्तं कस्मिन् कोणे करणीयम् ?

३. अनुराधानक्षत्रे गृहप्रवेशे किं फलम् ?

४. तिर्यक्मुखनक्षत्रे खातकर्म कर्तुं शक्यते न वा ?